पापेन्धनानां दहने ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श भक्तवन्तञ्च नाथं नारायणं द्विजः ॥
तुष्टाव गूढैः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव भुक्तं तेनैव किञ्चन ।
किञ्चिद्दरञ्च बन्धूनां भक्षणाय च दुर्लभम् ॥
शिवाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्तुद्रेकाच्च तत् सर्व्वं भुक्तञ्च शम्भुना मुदा ॥
भुक्त्वा सुदुर्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पुलकाञ्चितसर्व्वाङ्गः साश्रुनेत्रो मुदान्वितः ॥
गायन्नाम गुणं भक्त्या सुकण्ठः पञ्चवक्त्रतः ।
रागभेदैकतानेन तालमानेन सुन्दरम् ॥
पपात डमरुर्हस्तात् शूलञ्च व्याघ्रचर्म्म च ।
स्वयं निपत्य पश्चाच्च रुदन्मूर्च्छामवाप च ॥
अतीवकमनीयैतद्रूपध्यानैकमानसः ।
सहस्रदलमध्यस्थं मां पश्यन् हृत्सरोरुहे ॥
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ।
मुदा जगाम शीघ्रं तत् प्रसन्नवदनेक्षणा ॥
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वार्त्तां पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
तां शम्भुरुद्यतां देवीमुत्थाय च त्रिलोचनः ।
बोधयामास विविधं तुष्टाव संपुटाञ्जलिः ॥
श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ।
दुश्चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥
पार्व्वत्युवाच ।
सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चिताहं कथं विभो ॥
यतो न दत्तं नैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो गृहाणैतत् फलमेव महेश्वर !
अद्यप्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते जन्मैकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्रुरोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
तदा शिवः शिवां भक्त्या कृत्वा वक्षसि सादरम् ।
तन्मानभङ्गं स्तोत्रेण विनयेन चकार ह ॥
करेण चक्षुषोर्नीरं संमृज्य च पुनः पुनः ।
बोधयामास विविधैर्नीतिवाक्यैर्मनोहरैः ॥
परितुष्टा च सा देवी भर्त्तारं समुवाच ह ।
कलेवरञ्च त्यक्ष्यामि नैवेद्येन विना हरेः ॥
बिभर्म्मि देहं सततं तव सौभाग्यवर्द्धितम् ।
कथं वहामि सौभाग्यरहितञ्च कलेवरम् ॥
अपूर्व्वं तव नैवेद्यं जन्ममृत्युजराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तत्र विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवमुक्त्वा सा देवी देहं त्यक्तुं समुद्यता ।
भक्तो हरस्तत्पुरतः स्तुत्वा च स्वीचकार ह ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३७ अः ॥
तत्कारणान्तरं यथा,—

श्रीदेव्युवाच ।
"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ! ।
तत् कथं परमेशान ! निर्म्माल्यं तव दूषितम् ॥
ईश्वर उवाच ।
माभैर्माभैर्महादेवि ! ज्ञानसारं शृणु प्रिये ।
एतज्ज्ञानं महादेवि ! सारात्सारं परात्परम् ॥
पञ्चभूतात्मकं देवि मुखं मे परिकीर्त्तितम् ।
मध्यस्थानं स्थितं तत्तु तन्मुखं परमेश्वरि ! ॥
श्यामलं तत्तु ईशानं सदा ऊर्द्ध्वं सुचिस्मिते ! ।
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि मुखमूर्द्ध्वं वरानने ! ॥
क्षीरोदमन्थने देवि उत्थितं गरलं विषम् ।
उत्थितं गरलं यत्तु ब्रह्माण्डनाशकारकम् ॥
तदेव गरलं देवि हस्ते कृत्वा तु तद्विषम् ।
कृष्णाञ्जननिभं दिव्यं गरलं जलवत्तदा ॥
मम हस्ते महेशानि आविरासीत् शुचिस्मिते ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
निपीय तद्विषं सूक्ष्मं तीक्ष्णं ब्रह्माण्डनाशकम् ।
ततः श्याममुखे देवि न पीत्वा तद्विषं प्रिये ॥
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ।
ततःप्रभृति देवेशि मुखं ज्वालायते सदा ॥
कण्ठे तु कलुषं भूत्वा सदा तिष्ठति कामिनि ।
ततःप्रभृति देवेशि नीलकण्ठत्वमाप्नुयाम् ॥
ईशानं मन्मुखं देवि परं ब्रह्म वरानने ।
प्रत्यक्षरामयं देवि मन्मुखं कमलानने ॥
साक्षात् ज्योतिर्मयी देवी सदा मे मुखसंस्थिता ।
पत्रं वा यदि वा पुष्पं जलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो दद्यात् परमेशानि मन्मुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं ततः ।
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तत्र वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं मन्मुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि ! गृह्णीयात् शिरसा सदा ॥
स ब्रह्मतेजसा तस्य समतां याति सुन्दरि ! ।
न दद्याद्यदि देवेशि ! उपचारं शुचिस्मिते ! ॥
लिङ्गोपरि वरारोहे ! यस्य तस्य शुचिस्मिते ।
निगदामि शृणु प्रौढ़े वचनं मम कामिनि ॥
स एव नारकी भूत्वा नरकं सर्व्वदाप्नुयात् ।
अशेषनरकं भुक्त्वा अशेषयोनिमाव्रजेत् ॥
अशेषस्थावरं देवि जङ्गमञ्च तथा प्रिये ।
भुक्त्वा तु सर्व्वपापान् स अशेषक्रिमितां व्रजेत् ॥
शृणु देवि प्रवक्ष्यामि उच्छिष्टं मम पार्व्वति ।
उपचारं स्थापयित्वा पूतं पात्रान्तरे प्रिये ॥
कृत्वा तु मन्त्रपूतं हि उपचारं निवेदयेत् ।
वामदेवादि देवेशि मुखेषु वरवर्णिनि ॥
भक्षणं मम देवेशि ब्रह्माण्डसृष्टिकारकम् ।
एतद्धि परमेशानि ! ब्रह्मादीनां सुदुर्लभम् ॥
अशुचिर्वा शुचिर्वापि उच्छिष्टं भक्षयेद्यदि ।
स एव परमाराध्यः साक्षाद्ब्रह्म शुचिस्मिते ॥
उच्छिष्टभक्षणी कामी स एव श्रीसदाशिवः ।
निर्म्माल्यं दृढ़भक्तित्वाद्गृह्णीयाद्यस्तु पार्व्वति ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण सुन्दरि ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वाः किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ॥
निर्म्माल्येषु च देवेशि ! अधिकारी कथं भवेत् ॥"
इति लिङ्गार्च्चनतन्त्रे । १३ । १४ । पटलः ॥

नैवेशिकं, क्ली, (निवेशाय गार्हस्थ्याय हितम् । निवेश + ठक् ।) निवेशनार्थं गार्हस्थ्याय यत् कन्या दीयते तत् । इति मिताक्षरा ॥ यथा, याज्ञवल्क्यः । १ । २१० ।
"भूदीपांश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकं स्वर्णधुर्य्यं दत्त्वा स्वर्गे महीयते ।
निवेशसम्बन्धिनि, त्रि ॥

नैशं, त्रि, (निशाया इदम् । निशा + "तस्येदम् ।" ४ । ३ । १२० । इति अण् ।) निशासम्बन्धि । (यथा, बृहत्संहितायाम् । ४ । २ ।
"सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् ।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥") ॥
निशायां भवम् । निशा + "निशाप्रदोषाभ्याञ्च ।" ४ । ३ । १४ । इति पक्षे अण् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । २ । १०२ ।
"पूर्व्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥")

नैशिकं, त्रि, (निशायां भवम् । निशा + "निशाप्रदोषाभ्याञ्च ।" ४ । ३ । १४ । इति ठञ् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (निशाव्यापकम् ॥ स्त्रियां ङीप् । यथा, मनुः । ५ । ६७ ।
"नृणामकृतचूड़ानां विशुद्धिर्नैशिकी स्मृता ॥")

नैश्चित्यं, त्रि, निश्चितत्वम् । निश्चितस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैषधः, पुं, (निषधानां राजा । निषध + अण् ।) नलराजा । इति त्रिकाण्डशेषः ॥ (यथा महाभारते । ३ । ५३ । १६ ।
"तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥"
निषधदेशाधिपतिः । यथा, रघुः । १८ । १ ।
"स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ॥"
वर्षविशेषः । जम्बुद्वीपेश्वरोऽग्नीध्रस्तु स्वपुत्राय हरिवर्षाय वर्षमेतद्दत्तवान् । यथा, विष्णुपुराणे । २ । १ । २० ।
"तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ॥"
नैषधं नलमधिकृत्य कृतो ग्रन्थः । नैषध + अण्
स्वनामख्यातो हर्षदेवविरचितो द्वाविंशसर्गात्मकः काव्यग्रन्थविशेषः । यथा,—
"उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥" ॥
निषधानामयमिति । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) निषधसम्बन्धिनि, त्रि ॥